# AtmArpaNastutiH

# આત્માર્પણસ્તુતિઃ

## Document Information

Text title : AtmArpaNastuti by Shrimad Appayya Dixita

File name : AtmArpaNastuti.itx

Category : shiva, appayya-dIkShita

Location : doc_shiva

Author : Appayya Dikshita

Transliterated by : shaivam.org Corrected further

Proofread by : Rajani Arjun Shankar rajani_arjun at yahoo.com

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 10-12

Acknowledge-Permission: http://shaivam.org

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# આત્માર્પણસ્તુતિઃ

શ્રીમદપ્પય્ય દીક્ષિત વિરચિતા

કસ્તે બોદ્ધું પ્રભવતિ પરં દેવદેવ પ્રભાવં
યસ્માદિત્થં વિવિધરચના સૃષ્ટિરેષા બભૂવ ।
ભક્તિગ્રાહ્યસ્ત્વમિહ તદપિ ત્વામહં ભક્તિમાત્રાત્
સ્તોતું વાઞ્છામ્યતિમહદિદં સાહસં મે સહસ્વ ॥ ૧॥

ક્ષિત્યાદિનામવયવવતાં નિશ્ચિતં જન્મ તાવત્
તન્નાસ્ત્યેવ ક્વચન કલિતં કર્ત્રધિષ્ઠાનહીનમ્ ।
નાધિષ્ઠાતું પ્રભવતિ જડો નાપ્યનીશશ્ચ ભાવઃ
તસ્માદાદ્યસ્ત્વમસિ જગતાં નાથ જાને વિધાતા ॥ ૨॥

ઇન્દ્રં મિત્રં વરુણમનિલં પુનરજં વિષ્ણુમીશં var પદ્મજં
પ્રાહુસ્તે તે પરમશિવ તે માયયા મોહિતાસ્ત્વામ્ ।
એતૈઃ સાકં સકલમપિ યચ્છક્તિલેશે સમાપ્તં var એતૈસ્સાર્ધં
સ ત્વં દેવઃ શ્રુતિષુ વિદિતઃ શમ્ભુરિત્યાદિદેવઃ ॥ ૩॥

આનન્દાદ્યઃ કમપિ ચ ઘનીભાવમાસ્થાયરૂપં var આનન્દાબ્ધેઃ
શક્ત્યા સાર્ધં પરમમુમયા શાશ્વતં ભોગમૃચ્છન્ । ભોગમિચ્છન્
અધ્વાતીતે શુચિદિવસકૃત્કોટિદીપ્તે કપર્દિન્ var દીપે
આદ્યે સ્થાને વિહરસિ સદા સેવ્યમાનો ગણેશૈઃ ॥ ૪॥

ત્વં વેદાન્તૈઃ પ્રથિતમહિમા ગીયસે વિશ્વનેતઃ var વિવિધમહિમા
ત્વં વિપ્રાદ્યૈર્વરદ નિખિલૈરિજ્યસે કર્મભિઃ સ્વૈઃ ।
ત્વં દૃષ્ટાનુશ્રવિકવિષયાનન્દમાત્રાવિતૃષ્ણૈ-
રન્તર્ગ્રન્થિપ્રવિલયકૃતે ચિન્ત્યસે યોગિવૃન્દૈઃ ॥ ૫॥

ધ્યાયન્તસ્ત્વાં કતિચન ભવં દુસ્તરં નિસ્તરન્તિ
ત્વત્પાદાબ્જં વિધિવદિતરે નિત્યમારાધયન્તઃ ।

અન્યે વર્ણાશ્રમવિધિરતાઃ પાલયન્તસ્ત્વદાજ્ઞાં
સર્વં હિત્વા ભવજલનિધૌ દેવ મજ્જામિ ઘોરે ॥ ૬॥

variation ભવજલનિધાવેષ
ઉત્પદ્યાપિ સ્મરહર મહત્યુત્તમાનાં કુલેઽસ્મિન્
આસ્વાદ્ય ત્વન્મહિમજલધેરપ્યહં શીકરાણૂન્ ।
ત્વત્પાદાર્ચાવિમુખહૃદયશ્ચાપલાદિન્દ્રિયાણાં
વ્યગ્રસ્તુચ્છેષ્વહહ જનનં વ્યર્થયામ્યેષ પાપઃ ॥ ૭॥

અર્કદ્રોણપ્રભૃતિકુસુમૈરર્ચનં તે વિધેયં
પ્રાપ્યં તેન સ્મરહર ફલં મોક્ષસામ્રાજ્યલક્ષ્મીઃ ।
એતજ્જાનન્નપિ શિવ શિવ વ્યર્થયન્કાલમાત્મન્
આત્મદ્રોહી કરણવિવશો ભૂયસાધઃ પતામિ ॥ ૮॥

કિં વા કુર્વે વિષમવિષયસ્વૈરિણા વૈરિણાહં
બદ્ધઃ સ્વામિન્ વપુષિ હૃદયગ્રન્થિના સાર્ધમસ્મિન્ ।
ઉક્ષ્ણા દર્પજ્વરભરજુષા સાકમેકત્ર બદ્ધઃ
શ્રામ્યન્વત્સઃ સ્મરહર યુગે ધાવતા કિં કરોતુ ॥ ૯॥

નાહં રોદ્ધું કરણનિચયં દુર્નયં પારયામિ
સ્મારં સ્મારં જનિપથરુજં નાથ સીદામિ ભીત્યા ।
કિં વા કુર્વે કિમુચિતમિહ ક્વાદ્ય ગચ્છામિ હન્ત
ત્વત્પાદાબ્જપ્રપતનમૃતે નૈવ પશ્યામ્યુપાયમ્ ॥ ૧૦॥

ઉલ્લઙ્ઘ્યાજ્ઞામુડુપતિકલાચૂડ તે વિશ્વવન્દ્ય
ત્યક્તાચારઃ પશુવદધુના મુક્તલજ્જશ્ચરામિ ।
એવં નાનાવિધભવતતિપ્રાપ્તદીર્ઘાપરાધઃ
ક્લેશામ્ભોધિં કથમહમૃતે ત્વત્પ્રસદાત્તરેયમ્ ॥ ૧૧॥

ક્ષામ્યસ્યેવ ત્વમિહ કરુણાસાગરઃ કૃત્સ્નમાગઃ
સંસારોત્થં ગિરિશ સભયપ્રાર્થનાદૈન્યમાત્રાત્ ।
યદ્યપ્યેવં પ્રતિકલમહં વ્યક્તમાગઃસહસ્રં
કુર્વન્ મૂર્ખઃ કથમિવ તથા નિસ્ત્રપઃ પ્રાર્થયેયમ્ ॥ ૧૨॥

સર્વં ક્ષેમું પ્રભવતિ જનઃ સંસૃતિપ્રાપ્તમાગઃ
ચેતઃ શ્વાસપ્રશમસમયે ત્વત્પાદાબ્જે નિધાય ।
તસ્મિન્કાલે યદિ મમ મનો નાથ દોષત્રયાર્તં

પ્રજ્ઞાહીનં પુરહર ભવેત્ તત્કથં મે ઘટેત ॥ ૧૩॥

પ્રાણોત્ક્રાન્તિવ્યતિકરદલત્સન્ધિબન્ધે શરીરે
પ્રેમાવેશપ્રસરદમિતાક્રન્દિતે બન્ધુવર્ગે ।
અન્તઃ પ્રજ્ઞામપિ શિવ ભજન્નન્તરાયૈરનન્તૈઃ
આવિદ્ધોઽહં ત્વયિ કથમિમામર્પયિષ્યામિ બુદ્ધિમ્ ॥ ૧૪॥

અદ્યૈવ ત્વત્પદનલિનયોરર્પયામ્યન્તરાત્મન્
આત્માનં મે સહ પરિકરૈરદ્રિકન્યાધિનાથ ।
નાહં બોદ્ધું શિવ તવ પદં ન ક્રિયા યોગચર્યાઃ
કર્તું શક્નોમ્યનિતરગતિઃ કેવલં ત્વાં પ્રપદ્યે ॥ ૧૫॥

યઃ સ્રષ્ટારં નિખિલજગતાં નિર્મમે પૂર્વમીશઃ
તસ્મૈ વેદાનદિત સકલાન્ યશ્ચ સાકં પુરાણૈઃ ।
તં ત્વામાદ્યં ગુરુમહમસાવાત્મબુદ્ધિપ્રકાશં
સંસારાર્તઃ શરણમધુના પાર્વતીશં પ્રપદ્યે ॥ ૧૬॥

બ્રહ્માદીન્ યઃ સ્મરહર પશૂન્મોહપાશેન બદ્ધ્વા
સર્વાનેકશ્ચિદચિદધિકઃ કારયિત્વાઽઽત્મકૃત્યમ્ ।
યશ્ચૈતેષુ સ્વપદશરણાન્વિદ્યયા મોચયિત્વા
સાન્દ્રાનન્દં ગમયતિ પરં ધામ તં ત્વાં પ્રપદ્યે ॥ ૧૭॥

ભક્તાગ્ર્યાણાં કથમપિ પરૈર્યોઽચિકિત્સ્યામમર્ત્યૈઃ
સંસારાખ્યાં શમયતિ રુજં સ્વાત્મબોધૌષધેન ।
તં સર્વાધીશ્વર ભવમહાદીર્ઘતીવ્રામયેન
ક્લિષ્ટોઽહં ત્વાં વરદ શરણં યામિ સંસારવૈદ્યમ્ ॥ ૧૮॥

ધ્યાતો યત્નાદ્વિજિતકરણૈર્યોગિભિર્યો વિમુક્ત્યૈ (વિમૃગ્યઃ)
તેભ્યઃ પ્રાણોત્ક્રમણસમયે સંનિધાયાત્મનૈવ ।
તદ્વ્યાચષ્ટે ભવભયહરં તારકં બ્રહ્મ દેવઃ
તં સેવેઽહં ગિરિશ સતતં બ્રહ્મવિદ્યાગુરું ત્વામ્ ॥ ૧૯॥

દાસોઽસ્મીતિ ત્વયિ શિવ મયા નિત્યસિદ્ધં નિવેદ્યં
જાનાસ્યેતત્ ત્વમપિ યદહં નિર્ગતિઃ સંભ્રમામિ ।
નાસ્ત્યેવાન્યન્મમ કિમપિ તે નાથ વિજ્ઞાપનીયં
કારુણ્યાન્મે શરણવરણં દીનવૃત્તેર્ગૃહાણ ॥ ૨૦॥

બ્રહ્મોપેન્દ્રપ્રભૃતિભિરપિ સ્વેપ્સિતપ્રાર્થનાય
સ્વામિન્નગ્રે ચિરમવસરસ્તોષયદ્ભિઃ પ્રતીક્ષ્યઃ ।
દ્રાગેવ ત્વાં યદિહ શરણં પ્રાર્થયે કીટકલ્પઃ
તદ્વિશ્વાધીશ્વર તવ કૃપામેવ વિશ્વસ્ય દીને ॥ ૨૧॥

કર્મજ્ઞાનપ્રચયમખિલં દુષ્કરં નાથ પશ્યન્
પાપાસક્તં હૃદયમપિ ચાપારયન્સન્નિરોદ્ધુમ્ ।
સંસારાખ્યે પુરહર મહત્યન્ધકૂપે વિષીદન્
હસ્તાલમ્બપ્રપતનમિદં પ્રાપ્ય તે નિર્ભયોઽસ્મિ ॥ ૨૨॥

ત્વામેવૈકં હતજનિપથે પાન્થમસ્મિન્પ્રપઞ્ચે
મત્વા જન્મપ્રચયજલધેઃ બિભ્યતઃ પારશૂન્યાત્ ।
યત્તે ધન્યાઃ સુરવર મુખં દક્ષિણં સંશ્રયન્તિ
ક્લિષ્ટે ઘોરે ચિરમિહ ભવે તેન માં પાહિ નિત્યમ્ ॥ ૨૩॥

એકોઽસિ ત્વં શિવ જનિમતામીશ્વરો બન્ધમુક્ત્યોઃ
ક્લેશાઙ્ગારાવલિષુ લુઠતઃ કા ગતિસ્ત્વાં વિના મે ।
તસ્માદસ્મિન્નિહ પશુપતે ઘોરજન્મપ્રવાહે
ખિન્નં દૈન્યાકરમતિભયં માં ભજસ્વ પ્રપન્નમ્ ॥ ૨૪॥

યો દેવાનાં પ્રથમમશુભદ્રાવકો ભક્તિભાજાં
પૂર્વં વિશ્વાધિક શતધૃતિં જાયમાનં મહર્ષિઃ ।
દૃષ્ટ્યાપશ્યત્સકલજગતીસૃષ્ટિસામર્થ્યદાત્ર્યા
સ ત્વં ગ્રન્થિપ્રવિલયકૃતે વિદ્યયા યોજયાસ્માન્ ॥ ૨૫॥

યદ્યાકાશં શુભદ મનુજાશ્ચર્મવદ્વેષ્ટયેયુઃ
દુઃખસ્યાન્તં તદપિ પુરુષસ્ત્વામવિજ્ઞાય નૈતિ ।
વિજ્ઞાનં ચ ત્વયિ શિવ ઋતે ત્વત્પ્રસાદાન્ન લભ્યં
તદ્દુઃખાર્તઃ કમિહ શરણં યામિ દેવં ત્વદન્યમ્ ॥ ૨૬॥

કિં ગૂઢાર્થૈરકૃતકવચોગુમ્ફનૈઃ કિં પુરાણૈઃ
તન્ત્રાદ્યૈર્વા પુરુષમતિભિર્દુર્નિરૂપ્યૈકમત્યૈઃ ।
કિં વા શાસ્ત્રૈરફલકલહોલ્લાસમાત્રપ્રધાનૈઃ
વિદ્યા વિદ્યેશ્વર કૃતધિયાં કેવલં ત્વત્પ્રસાદાત્ ॥ ૨૭॥

પાપિષ્ટોઽહં વિષયચપલઃ સન્તતદ્રોહશાલી var સન્તતં દ્રોહશાલી
કાર્પણ્યૈકસ્થિરનિવસતિઃ પુણ્યગન્ધાનભિજ્ઞઃ ।

યદ્યપ્યેવં તદપિ શરણં ત્વત્પદાબ્જં પ્રપન્નં
નૈનં દીનં સ્મરહર તવોપેક્ષિતું નાથ યુક્તમ્ ॥ ૨૮॥

આલોચ્યૈવં યદિ મયિ ભવાન્ નાથ દોષાનનન્તાન્
અસ્મત્પાદાશ્રયણપદવીં નાર્હતીતિ ક્ષિપેન્મામ્ ।
અદ્યૈવેમં શરણવિરહાદ્વિદ્ધિ ભીત્યૈવ નષ્ટં
ગ્રામો ગૃહ્ણાત્યહિતતનયં કિં નુ માત્રા નિરસ્તમ્ ॥ ૨૯॥

ક્ષન્તવ્યં વા નિખિલમપિ મે ભૂતભાવિ વ્યલીકં
દુર્વ્યાપારપ્રવણમથવા શિક્ષણીયં મનો મે ।
ન ત્વેવાર્ત્યા નિરતિશયયા ત્વત્પદાબ્જં પ્રપન્નં
ત્વદ્વિન્યસ્તાખિલભરમમું યુક્તમીશ પ્રહાતુમ્ ॥ ૩૦॥

સર્વજ્ઞસ્ત્વં નિરવધિકૃપાસાગરઃ પૂર્ણશક્તિઃ
કસ્માદેનં ન ગણયસિ મામાપદબ્ધૌ નિમગ્નમ્ ।
એકં પાપાત્મકમપિ  રુજા સર્વતોઽત્યન્તદીનં
જન્તું યદ્યુદ્ધરસિ શિવ કસ્તાવતાતિપ્રસઙ્ગઃ ॥ ૩૧॥

અત્યન્તાર્તિવ્યથિતમગતિં દેવ મામુદ્ધરેતિ
ક્ષુણ્ણો માર્ગસ્તવ શિવ પુરા કેન વાઽનાથનાથ ।
કામાલમ્બે બત તદધિકાં પ્રાર્થનારીતિમન્યાં
ત્રાયસ્વૈનં સપદિ કૃપયા વસ્તુતત્ત્વં વિચિન્ત્ય ॥ ૩૨॥

એતાવન્તં ભ્રમણનિચયં પ્રાપિતોઽયં વરાકઃ
શ્રાન્તઃ સ્વામિન્નગતિરધુના મોચનીયસ્ત્વયાહમ્ ।
કૃત્યાકૃત્યવ્યપગતમતિર્દીનશાખામૃગોઽયં
સંતાડ્યૈનં દશનવિવૃતિં પશ્યતસ્તે ફલં કિમ્ ॥ ૩૩॥

માતા તાતઃ સુત ઇતિ સમાબધ્ય માં મોહપાશૈ-
રાપાત્યૈવં ભવજલનિધૌ હા કિમીશ ત્વયાઽઽપ્તમ્ ।
એતાવન્તં સમયમિયતીમાર્તિમાપાદિતેઽસ્મિન્
કલ્યાણી તે કિમિતિ ન કૃપા કાપિ મે ભાગ્યરેખા ॥ ૩૪॥

ભુઙ્ક્ષે ગુપ્તં બત સુખનિધિં તાત સાધારણં ત્વં
ભિક્ષાવૃત્તિં પરમભિનયન્માયયા માં વિભજ્ય ।
મર્યાદાયાઃ સકલજગતાં નાયકઃ સ્થાપકસ્ત્વં
યુક્તં કિં તદ્વદ વિભજનં યોજયસ્વાત્મના મામ્ ॥ ૩૫॥

ન ત્વા જન્મપ્રલયજલધેરુદ્ધરામીતિ ચેદ્ધીઃ
આસ્તાં તન્મે ભવતુ ચ જનિર્યત્ર કુત્રાપિ જાતૌ ।
ત્વદ્ભક્તાનામનિતરસુખૈઃ પાદધૂલીકિશોરૈઃ
આરબ્ધં મે ભવતુ ભગવન્ ભાવિ સર્વં શરીરમ્ ॥ ૩૬॥

કીટા નાગાસ્તરવ ઇતિ વા કિં ન સન્તિ સ્થલેષુ
ત્વત્પાદામ્ભોરુહપરિમલોદ્વાહિમન્દાનિલેષુ ।
તેષ્વેકં વા સૃજ પુનરિમં નાથ દીનાર્ત્તિહારિન્
આતોષાન્માં મૃડ ભવમહાઙ્ગારનદ્યાં લુઠન્તમ્ ॥ ૩૭॥

કાલે કણ્ઠસ્ફુરદસુકલાલેશસત્તાવલોક-
વ્યાગ્રોદગ્રવ્યસનિસકલસ્નિગ્ધરુદ્ધોપકણ્ઠે ।
અન્તસ્તોદૈરવધિરહિતામાર્તિમાપદ્યમાનો-
ઽપ્યઙ્ઘ્રિદ્વન્દ્વે તવ નિવિશતામન્તરાત્મન્ મમાત્મા ॥ ૩૮॥

અન્તર્બાષ્પાકુલિતનયનાનન્તરઙ્ગાનપશ્યન્
અગ્રે ઘોષં રુદિતબહુલં કાતરાણામશ્રુણ્વન્ ।
અત્યુત્ક્રાન્તિશ્રમમગણયન્ અન્તકાલે કપર્દિન્
અઙ્ઘ્રિદ્વન્દ્વે તવ નિવિશતામન્તરાત્મન્ મમાત્મા ॥ ૩૯॥

ચારુસ્મેરાનનસરસિજં ચન્દ્રરેખાવતંસં
ફુલ્લન્મલ્લીકુસુમકલિકાદામસૌભાગ્યચોરમ્ ।
અન્તઃપશ્યામ્યચલસુતયા રત્નપીઠે નિષણ્ણં
લોકાતીતં સતતશિવદં રૂપમપ્રાકૃતં તે ॥ ૪૦॥

સ્વપ્ને વાપિ સ્વરસવિકસદ્દિવ્યપઙ્કેરુહાભં
પશ્યેયં કિં તવ પશુપતે પાદયુગ્મં કદાચિત્ ।
ક્વાહં પાપઃ ક્વ તવ ચરણાલોકભાગ્યં તથાપિ
પ્રત્યાશાં મે ઘટયતિ પુનર્વિશ્રુતા તેઽનુકમ્પા ॥ ૪૧॥

ભિક્ષાવૃત્તિં ચર પિતૃવને ભૂતસઙ્ઘૈર્ભ્રમેદં
વિજ્ઞાતં તે ચરિતમખિલં વિપ્રલિપ્સોઃ કપાલિન્ ।
આવૈકુણ્ઠદ્રુહિણમખિલપ્રાણિનામીશ્વરસ્ત્વં
નાથ સ્વપ્નેઽપ્યહમિહ ન તે પાદપદ્મં ત્યજામિ ॥ ૪૨॥

આલેપનં ભસિતમાવસથઃ શ્મશાનં

અસ્થીનિ તે સતતમાભરણાનિ સન્તુ ।
નિહ્નોતુમીશ સકલશ્રુતિપારસિદ્ધં
ઐશ્વર્યમમ્બુજભવોઽપિ ચ ન ક્ષમસ્તે ॥ ૪૩॥

વિવિધમપિ ગુણૌઘં વેદયન્ત્યર્થવાદાઃ
પરિમિતવિભવાનાં પામરાણાં સુરાણામ્ ।
તનુહિમકરમૌલે તાવતા ત્વત્પરત્વે
કતિ કતિ જગદીશાઃ કલ્પિતા નો ભવેયુઃ ॥ ૪૪॥

વિહર પિતૃવને વા વિશ્વપારે પુરે વા
રજતગિરિતટે વા રત્નસાનુસ્થલે વા ।
દિશ ભવદુપકણ્ઠં દેહિ મે ભૃત્યભાવં
પરમશિવ તવ શ્રીપાદુકાવાહકાનામ્ ॥ ૪૫॥

બલમબલમમીષાં બલ્બજાનાં વિચિન્ત્યં
કથમપિ શિવ કાલક્ષેપમાત્રપ્રધાનૈઃ ।
નિખિલમપિ રહસ્યં નાથ નિષ્કૃષ્ય સાક્ષાત્
સરસિજભવમુખ્યૈઃ સાધિતં નઃ પ્રમાણમ્ ॥ ૪૬॥

ન કિંચિન્મેનેઽતઃ સમભિલષણીયં ત્રિભુવને
સુખં વા દુઃખં વા મમ ભવતુ યદ્ભાવિ ભગવન્ ।
સમુન્મીલત્પાથોરુહકુહરસૌભાગ્યમુષિતે
પદદ્વન્દ્વે ચેતઃ પરિચયમુપેયાન્મમ સદા ॥ ૪૭॥

ઉદરભરણમાત્રં સાધ્યમુદ્દિશ્ય નીચે-
ષ્વસકૃદુપનિબદ્ધામાહિતોચ્છિષ્ટભાવામ્ ।
અહમિહ નુતિભઙ્ગીમર્પયિત્વોપહારં
તવ ચરણસરોજે તાત જાતોઽપરાધી ॥ ૪૮॥

સર્વં સદાશિવ સહસ્વ મમાપરાધં
મગ્નં સમુદ્ધર મહત્યમુમાપદબ્ધૌ ।
સર્વાત્મના તવ પદામ્બુજમેવ દીનઃ
સ્વામિન્નનન્યશરણઃ શરણં પ્રપદ્યે ॥ ૪૯॥

આત્માર્પણસ્તુતિરિયં ભગવન્નિબદ્ધા
યદ્યપ્યનન્યમનસા ન મયા તથાપિ ।
વાચાપિ કેવલમયં શરણં વૃણીતે

દીનો વરાક ઇતિ રક્ષ કૃપાનિધે મામ્ ॥ ૫૦॥

ઇતિ શ્રીમદપ્પય્યદીક્ષિતેન્દ્રાણાં કૃતિષ્વન્યતમા આત્માર્પણસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Rajani Arjun Shankar rajani_arjun at yahoo.com

*AtmArpaNastutiH*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*